शास्त्रीयग्रन्थमाला-८

पाणिनीयाष्टाध्याय्या

# नव्यसिद्धान्तकौमुदी

इत्यपरनामविभूषितं

# पौष्पं प्रक्रियाविज्ञानम्

तत्र चतुर्थभागस्य प्रथमः खण्डः

## आतिदेशिकधातवः

प्रणेत्री सम्पादयित्री च

दीक्षितपुष्पा

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

शास्त्रीयग्रन्थमाला-८

पाणिनीयाष्टाध्याय्या

# नव्यसिद्धान्तकौमुदी

इत्यपरनामविभूषितं

## पौष्पं प्रक्रियाविज्ञानम्

तत्र चतुर्थभागस्य प्रथमः खण्डः

## आतिदेशिकधातवः

( सनादिप्रत्ययान्ताः )

प्रणेत्री सम्पादयित्री च

दीक्षितपुष्पा

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

# नव्यसिद्धान्तकौमुदी-चतुर्थभागस्य प्रथमः खण्डः

### द्वादशसनादिप्रत्ययान्ता आतिदेशिकधातवः

---

## अनुबन्धविज्ञानम्

पाणिनीयशास्त्रमनुबन्धानाश्रित्य, स्वराँश्चाश्रित्य प्रवर्तते। एतयोर्ज्ञानमन्तरा पाणिनीयशास्त्रस्यावगतिर्न भवतीत्ययं सस्वरः सानुनासिकश्च धातुपाठो मया प्रस्तूयते। धातुष्वनुनासिकज्ञानं विनाचामित्संज्ञा न संभवति। अथ च स्वरस्य ज्ञानं विना पदज्ञानं न संभवति, न च सेडनिड्विज्ञानम्। अतः स्वरज्ञानेनैव पदज्ञानं सेडनिड्ज्ञानं च जायते।

अस्मिन् धातुपाठे धातुष्वच उपरि ' ँ ' यदेतादृशं चिह्नं दृश्यते, तत् तस्याचोऽनुनासिकत्वं सूचयति। यथा - ३६९. खनुँ अवदारणे। २५३. डुपचँष् पाके। २६३. भजँ सेवायाम्। २६२. यजँ देवपूजासङ्गतिकरणदानेषु। ३६४. मनँ ज्ञाने। २५७. शचँ व्यक्तायां वाचि। २५०. वचँ परिभाषणे। ५२८. वसँ आच्छादने। १४८०. आसँ उपवेशने। १२२०. एधँ वृद्धौ, इत्यादिषु ' ँ ' अनेन चिह्नेनाङ्कितोऽजनुनासिकः।

धातुष्वचोऽधस्ताद् या रेखा दृश्यते, सा तस्याचोऽनुदात्तत्वं सूचयति। यथा - ५२८. वसँ आच्छादने। १४८०. आसँ उपवेशने। १२२०. एधँ वृद्धौ, इत्यादिष्वधोरेखयाऽङ्कितोऽजऽनुदात्तः।

धातुष्वच उपरि या रेखा दृश्यते, सा तस्याचः स्वरितत्वं सूचयति। यथा - ३६९. खनुँ अवदारणे। २५३. डुपचँष् पाके। २६३. भजँ सेवायाम्। २६२. यजँ देवपूजासङ्गतिकरणदानेषु, इत्यादिषूपरिरेखया. ऽङ्कितोऽच् स्वरितः।

धातुषु यस्याचोऽधस्ताद्, उपरि वा कापि रेखा न दृश्यते, सोऽच् उदात्तो भवति। यथा - ५२८. वसँ आच्छादने, इत्यत्र रेखाचिह्नरहितो वकारोत्तरोऽकार उदात्तः। १४८०. आसँ उपवेशने, इत्यत्र रेखाचिह्नरहित आकार उदात्तः। १२२०. एधँ वृद्धौ, इत्यत्र रेखाचिह्नरहित एकार उदात्तः। ९१२. गृहूँ ग्रहणे, इत्यत्र रेखाचिह्नरहितो गकारोत्तर ऋकार उदात्तः। इदमवधेयं यद् धातुष्वनुनासिकोऽजित्संज्ञां प्रयोजयति। उदात्तादयश्च स्वराः पदनिर्णयं विदधतीत्ययं विशेषः।

## इत्संज्ञाप्रकरणम्

पाणिनीयशास्त्रे धातवः, प्रत्ययाश्च, यथोपदिष्टास्तथैव न प्रयुज्यन्ते। तत्र धातुष्वनुबन्धा आसज्जिताः। यथा - डुकृञ् अयं धातुः। अत्रादौ 'डु', अन्ते 'ञ्', इमावनुबन्धौ। 'कृ' अयं धातुः। एवमेव - टुनदि, ञिमिदा, डुपचष् इत्यादिष्वपि आदावन्ते चानुबन्धौ। बाधृ, अञ्चु, शद्लृ, गम्लृ इत्यादिष्वन्तेऽनुबन्धाः।

प्रत्ययेष्वप्यनुबन्धा आसज्जिताः। यथा ण्वुल् इत्यत्रादौ 'ण्' अन्ते 'ल्', इत्यनुबन्धौ। एवमेव ष्वुन्, षाकन्, इत्यादिषु। उपदेशेष्वेतेषामनुबन्धानां विज्ञानं विना शास्त्रस्य प्रवृत्तिरेव न संभवति, अत इत्संज्ञाप्रकरणमुच्यते-




**डॉ. पुष्पा दीक्षिता**

अध्यक्षा, पाणिनीयशोधसंस्थानम्

बिलासपुरम्


१.७.१९४२ दिनाङ्के जबलपुरनगरस्य प्रख्यातायुर्वेदचिकित्सकात् शास्त्राणां पारदृश्वनः प्राणाचार्यपण्डितसुन्दरलालशुक्लाज्जानकीदेव्यां लब्धजनिः महामहोपाध्यायाचार्या डॉ. पुष्पा दीक्षिता, आचार्यविश्वनाथत्रिपाठिभ्यो व्याकरणमधीत्य मध्य-प्रदेशशासनस्याथ च छत्तीसगढ़प्रदेशशासनस्य महाविद्यालयीयप्राध्यापकपदान्निवृत्ता।

सा च भगवतः पाणिनेर्महत्तमेन तपसा निर्धारितं पाणिनीयाष्टाध्यायीसूत्रक्रमं साक्षात्कृत्य प्रक्रियायाः सर्वथा नवीनं क्रमं प्रक्रियाविज्ञानं च प्रोद्घाटितवती, येन निखिलाष्टाध्यायी त्रिभिर्मासैरधिगता भवतीति नास्ति संशीतिलेशोऽपि।

**प्रकाशितग्रन्थाः -**

१. अष्टाध्यायीसहजबोधः, अष्टसु भागेषु (तत्र चत्वारो भागाः प्रकाशिताः)
२. नव्यसिद्धान्तकौमुदी, चतुर्दशसु भागेषु (तत्र पञ्च भागाः प्रकाशिताः)
३. तिङन्तकोषः (त्रयो भागाः)
४. कृदन्तकोषः (द्वौ भागौ)
५. तिङ्कृत्कोषः (द्वौ भागौ)
६. लकारसरणिः (चत्वारो भागाः)
७. णिजन्तकोषः
८. सन्नन्तकोषः
९. यङन्तकोषः
१०. यङ्लुगन्तकोषः
११. इडागमः (संस्कृते, राष्ट्रभाषायाञ्च)
१२. पाणिनीयाष्टाध्यायीसूत्रपाठः (प्रकरणनिर्देशसमन्वितः)
१३. प्रकियानुसारिपाणिनीयधातुपाठः
१४. शीघ्रबोधव्याकरणम्
१५. पाणिनीयधातुपाठः (सार्थः)
१६. औपदेशिकः पाणिनीयधातुपाठः (सार्वधातुकप्रत्ययोपयोगी)
१७. औपदेशिकः पाणिनीयधातुपाठः (आर्धधातुकप्रत्ययोपयोगी)
१८. तिङ्कृत्कोषः (द्वौ भागौ)
१९. अग्निशिखा (गीतिकाव्यम्)
२०. शाम्भवी (गीतिकाव्यम्)
२१. अपराजितवधूः (खण्डकाव्यम्) अस्य संपादनमनुवादश्च
२२. प्रबुद्धभारतम् (खण्डकाव्यम्) अस्य संपादनमनुवादश्च
२३. सौन्दर्यलहरी, अस्याः संपादनम्

**प्रकाश्यग्रन्थाः -**

२४. नव्यसिद्धान्तकौमुदी (अवशिष्टा नव भागाः)
२५. अष्टाध्यायीसहजबोधः (अवशिष्टाश्चत्वारो भागाः)
२६. परिभाषेन्दुशेखरस्य बहुतरपरिभाषाणामन्यथासिद्धिः

अन्ये च